# Ribhuproktam Sarvamatmaprakaranam

# ઋભુપ્રોક્તં સર્વમાત્મપ્રકરણમ્

## Document Information

Text title : Ribhuproktam Sarvamatmaprakaranam

File name : RRibhuproktaMsarvamAtmaprakaraNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 13 | 1-2, 5-11, 13-59||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ૠભુપ્રોક્તં સર્વમાત્મપ્રકરણમ્

(આત્મનોઽન્યન્ન કિઞ્ચન)
શ‍ૃણુષ્વ દુર્લભં લોકે સારાત્સારતરં પરમ્ ।
આત્મરૂપમિદં સર્વમાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧॥

સર્વમાત્માસ્તિ પરમા પરમાત્મા પરાત્મકઃ ।
નિત્યાનન્દસ્વરૂપાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨॥

મુક્તામુક્તસ્વરૂપાત્મા મુક્તામુક્તવિવર્જિતઃ ।
મોક્ષરૂપસ્વરૂપાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫॥

દ્વૈતાદ્વૈતસ્વરૂપાત્મા દ્વૈતાદ્વૈતવિવર્જિતઃ ।
સર્વવર્જિતસર્વાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૬॥

મુદામુદસ્વરૂપાત્મા મોક્ષાત્મા દેવતાત્મકઃ ।
સઙ્કલ્પહીનસારાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૭॥

નિષ્કલાત્મા નિર્મલાત્મા બુદ્ધ્યાત્મા પુરુષાત્મકઃ ।
આનન્દાત્મા હ્યજાત્મા ચ હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૮॥

અગણ્યાત્મા ગણાત્મા ચ અમૃતાત્મામૃતાન્તરઃ ।
ભૂતભવ્યભવિષ્યાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૯॥

અખિલાત્માઽનુમન્યાત્મા (માનાત્મા) માનાત્મા ભાવભાવનઃ ।
તુર્યરૂપપ્રસન્નાત્મા આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૦॥

નિત્યં પ્રત્યક્ષરૂપાત્મા નિત્યપ્રત્યક્ષનિર્ણયઃ ।
અન્યહીનસ્વભાવાત્મા આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૧॥

નિત્યાનિત્યવિહીનાત્મા ઇહામુત્રફલાન્તરઃ ।
શમાદિષટ્કશૂન્યાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૩॥

મુમુક્ષુત્વં ચ હીનાત્મા શબ્દાત્મા દમનાત્મકઃ ।

નિત્યોપરતરૂપાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૪॥

સર્વકાલતિતિક્ષાત્મા સમાધાનાત્મનિ સ્થિતઃ ।
શુદ્ધાત્મા સ્વાત્મનિ સ્વાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૫॥

અન્નકોશવિહીનાત્મા પ્રાણકોશવિવર્જિતઃ ।
મનઃકોશવિહીનાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૬॥

વિજ્ઞાનકોશહીનાત્મા આનન્દાદિવિવર્જિતઃ ।
પઞ્ચકોશવિહીનાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૭॥

નિર્વિકલ્પસ્વરૂપાત્મા સવિકલ્પવિવર્જિતઃ ।
શબ્દાનુવિદ્ધહીનાત્મા (શબ્દાનુવિધ્યહીનાત્મા) હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૮॥

સ્થૂલદેહવિહીનાત્મા સૂક્ષ્મદેહવિવર્જિતઃ ।
કારણાદિવિહીનાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૧૯॥

દૃશ્યાનુવિદ્ધશૂન્યાત્મા હ્યાદિમધ્યાન્તવર્જિતઃ ।
શાન્તા સમાધિશૂન્યાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૦॥

પ્રજ્ઞાનવાક્યહીનાત્મા અહં બ્રહ્માસ્મિવર્જિતઃ ।
તત્ત્વમસ્યાદિવાક્યાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૧॥

અયમાત્મેત્યભાવાત્મા સર્વાત્મા વાક્યવર્જિતઃ ।
ઓઙ્કારાત્મા ગુણાત્મા ચ હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૨॥

જાગ્રદ્ધીનસ્વરૂપાત્મા સ્વપ્નાવસ્થાવિવર્જિતઃ ।
આનન્દરૂપપૂર્ણાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૩॥

ભૂતાત્મા ચ ભવિષ્યાત્મા હ્યક્ષરાત્મા ચિદાત્મકઃ ।
અનાદિમધ્યરૂપાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૪॥

સર્વસઙ્કલ્પહીનાત્મા સ્વચ્છચિન્માત્રમક્ષયઃ ।
જ્ઞાતૃજ્ઞેયાદિહીનાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૫॥

એકાત્મા એકહીનાત્મા દ્વૈતાદ્વૈતવિવર્જિતઃ ।
સ્વયમાત્મા સ્વભાવાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૬॥

તુર્યાત્મા નિત્યમાત્મા ચ યત્કિઞ્ચિદિદમાત્મકઃ ।
ભાનાત્મા (માનાત્મા) માનહીનાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૭॥

વાચાવધિરનેકાત્મા વાચ્યાનન્દાત્મનન્દકઃ ।
સર્વહીનાત્મસર્વાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૮॥

આત્માનમેવ વીક્ષસ્વ આત્માનં ભાવય સ્વકમ્ ।
સ્વસ્વાત્માનં સ્વયં ભુઙ્ક્ષ્વ હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૨૯॥

સ્વાત્માનમેવ સન્તુષ્ય આત્માનં સ્વયમેવ હિ ।
સ્વસ્વાત્માનં સ્વયં પશ્યેત્સ્વમાત્માનં સ્વયં શ્રુતમ્ ॥ ૧૩.૩૦॥

સ્વમાત્મનિ સ્વયં તૃપ્તઃ સ્વમાત્માનં સ્વયમ્ભરઃ ।
સ્વમાત્માનં સ્વયં ભસ્મ હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૧॥

સ્વમાત્માનં સ્વયં મોદં સ્વમાત્માનં સ્વયં પ્રિયમ્ ।
સ્વમાત્માનમેવ મન્તવ્યં હ્યાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૨॥

આત્માનમેવ શ્રોતવ્યં આત્માનં શ્રવણં ભવ ।
આત્માનં કામયેન્નિત્યમાત્માનં નિત્યમર્ચય ॥ ૧૩.૩૩॥

આત્માનં શ્લાઘયેન્નિત્યમાત્માનં પરિપાલય ।
આત્માનં કામયેન્નિત્યમાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૪॥

આત્મૈવેયમિયં ભૂમિઃ આત્મૈવેદમિદં જલમ્ ।
આત્મૈવેદમિદં જ્યોતિરાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૫॥

આત્મૈવાયમયં વાયુરાત્મૈવેદમિદં વિયત્ ।
આત્મૈવાયમહઙ્કારઃ આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૬॥

આત્મૈવેદમિદં ચિત્તં આત્મૈવેદમિદં મનઃ ।
આત્મૈવેયમિયં બુદ્ધિરાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૭॥

આત્મૈવાયમયં દેહઃ આત્મૈવાયમયં ગુણઃ ।
આત્મૈવેદમિદં તત્ત્વમાત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૮॥

આત્મૈવાયમયં મન્ત્રઃ આત્મૈવાયમયં જપઃ ।
આત્મૈવાયમયં લોકઃ આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૩૯॥

આત્મૈવાયમયં શબ્દઃ આત્મૈવાયમયં રસઃ ।
આત્મૈવાયમયં સ્પર્શઃ આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૦॥

આત્મૈવાયમયં ગન્ધઃ આત્મૈવાયમયં શમઃ ।
આત્મૈવેદમિદં દુઃખં આત્મૈવેદમિદં સુખમ્ ॥ ૧૩.૪૧॥

આત્મીયમેવેદં જગતાત્મીયઃ સ્વપ્ન એવ હિ ।
સુષુપ્તં ચાપ્યથાત્મીયં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૨॥

આત્મૈવ કાર્યમાત્મૈવ પ્રાયો હ્યાત્મૈવમદ્વયમ્ ।
આત્મીયમેવમદ્વૈતં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૩॥

આત્મીયમેવાયં કોઽપિ આત્મૈવેદમિદં ક્વચિત્ ।
આત્મૈવાયમયં લોકઃ આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૪॥

આત્મૈવેદમિદં દૃશ્યં આત્મૈવાયમયં જનઃ ।
આત્મૈવેદમિદં સર્વં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૫॥

આત્મૈવાયમયં શમ્ભુઃ આત્મૈવેદમિદં જગત્ ।
આત્મૈવાયમયં બ્રહ્મા આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૬॥

આત્મૈવાયમયં સૂર્ય આત્મૈવેદમિદં જડમ્ ।
આત્મૈવેદમિદં ધ્યાનમાત્મૈવેદમિદં ફલમ્ ॥ ૧૩.૪૭॥

આત્મૈવાયમયં યોગઃ સર્વમાત્મમયં જગત્ ।
સર્વમાત્મમયં ભૂતં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૮॥

સર્વમાત્મમયં ભાવિ સર્વમાત્મમયં ગુરુઃ ।
સર્વમાત્મમયં શિષ્ય આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૪૯॥

સર્વમાત્મમયં દેવઃ સર્વમાત્મમયં ફલમ્ ।
સર્વમાત્મમયં લક્ષ્યં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૦॥

સર્વમાત્મમયં તીર્થં સર્વમાત્મમયં સ્વયમ્ ।
સર્વમાત્મમયં મોક્ષં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૧॥

સર્વમાત્મમયં કામં સર્વમાત્મમયં ક્રિયા ।
સર્વમાત્મમયં ક્રોધઃ આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૨॥

સર્વમાત્મમયં વિદ્યા સર્વમાત્મમયં દિશઃ ।
સર્વમાત્મમયં લોભઃ આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૩॥

સર્વમાત્મમયં મોહઃ સર્વમાત્મમયં ભયમ્ ।
સર્વમાત્મમયં ચિન્તા આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૪॥

સર્વમાત્મમયં ધૈર્યં સર્વમાત્મમયં ધ્રુવમ્ ।

સર્વમાત્મમયં સત્યં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૫॥

સર્વમાત્મમયં બોધં સર્વમાત્મમયં દૃઢમ્ ।
સર્વમાત્મમયં મેયં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૬॥

સર્વમાત્મમયં ગુહ્યં સર્વમાત્મમયં શુભમ્ ।
સર્વમાત્મમયં શુદ્ધં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૭॥

સર્વમાત્મમયં સર્વં સત્યમાત્મા સદાત્મકઃ ।
પૂર્ણમાત્મા ક્ષયં ચાત્મા પરમાત્મા પરાત્પરઃ ॥ ૧૩.૫૮॥

ઇતોઽપ્યાત્મા તતોઽપ્યાત્મા હ્યાત્મૈવાત્મા તતસ્તતઃ ।
સર્વમાત્મમયં સત્યં આત્મનોઽન્યન્ન કિઞ્ચન ॥ ૧૩.૫૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં સર્વમાત્મપ્રકરણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૧૩ । ૧-૨, ૫-૧૧, ૧૩-૫૯॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 13 . 1-2, 5-11, 13-59..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Sarvamatmaprakaranam*
pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*